| | Sanskrit (Entire) | |
|---|---|---|
| TIME : 2½ HRS. | MARCH 2008 | MARKS :60 |

**प्र.1.(A) Translate into English any three of the following passages : 15**

(i) महान्संघर्षः समुपस्थितः अनेन प्रसङ्गेन। हरिद्राविषयकाः प्रश्नाः संशयाश्च एतेन वैज्ञानिकेन विचार्य्य निराकृताः। क्व विकसितः धनाढ्यः अमेरिकादेशः क्व च विकसनशीलः अल्पधनः भारतदेशः। तथापि हरिद्रायाः स्वामित्वसङ्गरः, जितोऽस्माभिः। विजयस्यास्य प्रणेता आसीत् डॉ. रघुनाथ माशेलकरः। अस्य महाराष्ट्रीयत्वं तु अस्माकं कृते अतीव प्रमोदावहम् अभिमानास्पदं च।

(ii) **देवकुलिकः** - (प्रविश्य) मा दैवतशङ्कया। क्षत्रिया ह्यत्रभवन्तः।

**भरतः** - एसम्। क्षत्रिया ह्यत्रभवन्तः। अथके नामात्रभवन्तः।

**देवकुलिकः** - इक्ष्वाकवः।

**भरतः** - (सहर्षम्) इक्ष्वाकव इति। एते तेऽयोध्याभर्तारः। भोः! यदृच्छया खलु मया महत् फलमासादितम्। अभिधीयतां कस्तावदत्रभवान्।

(iii) तात चन्द्रापीड, आलोकयतु तावत् लक्ष्मीमेव प्रथमम। इयं हि क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्. कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेः कठोरताम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता। लब्धपि दुःखेन पारिपाल्यते।

(iv) धर्मराज, तस्य ब्राह्मणगृहे प्रकीर्णेषु अन्नकणेषु लुठित्वा मम अर्धाङ्गं हेममयं जाम्। अधुना शेषम् अर्धाङ्गं स्वर्णमयं भवतं इत्यर्थम् अहं भृशमं आटम्। परं निराशः अहं अत्र तव यज्ञमण्डपं समायातः। चिन्तितं, यत् तम यज्ञभोजनस्य अवशिष्टेन मम अर्धमङ्गं सुवर्णमयं भविष्यत्येव अत एव अत्र लुठामि। तस्मिन्नेव क्षणे युधिष्ठिरः श्रीकृष्णःच परस्परम् ऐक्षेताम।

(v) एवं तर्योभेदः उत्पन्नोऽभवत्। कोऽपि द्वितीयेन सह नातिष्ठत् न चावदत्। सदैव च दूरेऽतिष्ठताम्। एकदा सिंह एकं वृषभमेकाकिनं चरन्तपश्यत्। दृष्टवैव च सः तं प्राहरत्, नखैः विदार्य चाभक्षयत्। तदनन्तरम् सः द्वितीयमपि वृषभं तथैव हत्त्वाऽभक्षयत्। एवं द्वावेव सुहृदौ भेदेन नष्टौ।

**(B) Translate any two of the following poetry passage : 8**

(i) 1. संहतिः श्रेयंसौ पुंसां स्वकुलैरल्पकैरपि।
तुषेणापि परित्यक्ताः न प्ररोहन्ति तण्डुलाः।।

2. 'रा' कारोच्चारमात्रेण मुखान्निर्याति पातकम्।
पुनःप्रवेशसन्देहे 'म'कारस्तकपाटवत्।।

(ii) 1. यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।।

2. स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिः तुलाकोटेः खलस्य च।।

(iii) मन्दं हसन्तं प्रभया लसन्तं
जनस्य चित्तं सततं हरन्तम्।
वेणुं नितान्तं मधु नादयन्तं
बालं मुकुन्दं मनसा स्मरासि।।

(iv) 1. करोति निर्मलाधारः तुच्छस्यापि महार्हताम्।
अम्बुनो बिन्दुरल्पोऽधि शुक्तौ मुक्ताफलं भवेत्।।
2. एकेन तिष्ठताधस्तादन्येनोपरि तिष्ठता।।
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः।।

**प्र.2.(A) Answer any two of the following in English :** **4**

(i) माणसाने झाडावर चढण्याचा विचार का केला ?
(ii) वृक्षांना सत्पुरुषांची उपमा का दिली आहे ?
(iii) महाकवीने हिमालयाचे वर्णन कसे केले आहे ?
(iv) कोणत्या गोष्टी आपोआप पसरतात ?

**(B) Complete any three verses from the following :** **6**

(i) रे कूप ............................ ।
...................... सन्निधौ कुरु।।
(ii) ये यथा मां ....................... ।
...................... शरणं व्रज।।
(iii) सन्त एव ......................... ।
...................... धुरंधराः।।
(iv) स्वभावसुन्दरं ........................ ।
............................ युज्यते।।
(v) अन्तः सारै .......................... ।
............................मन्दिरम्।।

**प्र.3.(A) Give forms (any two from each groups) :** **6**

(i) 1. लता - चतुर्थी एकवचन
2. पितृ - षष्ठी बहुवचन
3. पथिन् - द्वितीया बहुवचन
4. दिश् - सप्तमी द्विवचन

(ii) 1. इदम् (स्त्री.) - षष्ठी एकवचन
2. एतद् (पुं.) - तृतीया एकवचन
3. अन्य (नपुं.) - प्रथमा बहुवचन
4. युष्मद् - पंचमी द्विवचन

(iii) 1. ज्ञा (9आ.) - वर्तमानकाळ, तृतीय पुरूष बहुवचन
2. ब्रू (2प.) - आज्ञार्थ, द्वितीय पुरूष एकवचन
3. उप + गम (1प.) - पूर्वकालवाचक धातुसाधित अव्यय
4. प्रति + ईक्ष् (1आ.) - वर्तमानकालवाचक धातुसाधित विशेषण, पुं. प्रथमा एकवचन

**(B) Dissolve the name any two of the following compounds : 2**

(i) भूमिदानम्, (ii) यथाकालम्, (iii) संस्कृतज्ञः, (iv) सप्तपदी।

**(C) Dissolve any two संधी : 2**

(i) नद्यास्तीरे (ii) दैवतान्युपासते (iii) प्रस्थितोऽसि (iv) पठन्निदम्।

**(D) Make any two संधी : 2**

(i) वि + छेद, (ii) उत्कण्ठितः + अहम्, (iii) धातुभिः + च, (iv) त्वम् + तु।

**Q.4.(A) Recognise any three forms of the following : 3**

(i) भविष्यावः (ii) दृश्यन्ते (iii) मुमोच, (iv) मनसा (v) सर्वाभिः (vi) विहर्तुम्।

**(B) Match the following parts of sentences : (Any two) 2**

| **'अ' गट** | **'ब' गट** |
|---|---|
| (i) विद्याभ्यासार्थं काशीक्षेत्रे | (क) ज्ञानमेव दत्तवान्। |
| (ii) विष्णौभुजगशयनाटुत्थिते | (ख) जगाम सः। |
| (iii) अहं तु पादमात्रं | (ग) मम शापान्तः स्यात्। |
| | (घ) ब्रह्मणि विलीनः। |

**(C) Rewrite any two sentences by using correct alternative from the brackets : 2**

(i) विश्वजितो यज्ञस्य प्रवर्तयिता ........... । (अजः, रघुः, दिलीपः)
(ii) वयं मधुराणि आम्रफलानि ........... । (भुञ्जमः, भुङ्क्त, भुञ्ज्वः)
(iii) तस्याः ........... स्पृहयन्तः हंसाः क्षीणोत्साहाः। (जलम्, जलेन, जलाय)

**(D) Give synonyms in Sanskrit : (any two) 1**

(i) दैवम् (ii) जाह्नवी (iii) शिष्य (iv) लक्ष्मीः।

**(E) Give antonyms in Sanskrit : (any two) 1**

(i) आदरः (ii) अस्तः (iii) चिरकालम् (iv) सरलम्।

**(F) (1) Do as directed : (any two)** **2**

(i) सः पदयात्राम् आरेभे। (क्रियापदाचे प्रथम भूतकाळाचे रूप योजा.)

(ii) एतदर्थम् अभिनन्दनीयोऽसि त्वम्। ('त्वम्' ऐवजी 'भवान्' वापरा.)

(iii) सः वृषभौ दृष्ट्वाऽचिन्तयत्। (प्रयोग बदला.)

(iv) समाप्तेऽपि विद्याभ्यासे अशान्तं मे मनः (सति सप्तमी काढा.)

**(2) Rewrite any two sentence by using correct form of the numeral given in brackets :** **1**

(i) कीटकस्य (6) पदाः सन्ति।

(ii) एतद् गीतम् अहं ........... (2 वेळा) भणितवान्।

**Q.5. (A) Answer any four of the following questions in Sanskrit :** **5**

(i) जलदः किं पूरयति ?

(ii) भावेमहाशयः कस्य एकमतः शिष्यः आसीत् ?

(iii) कीदृशः विहगः न प्रयाति ?

(iv) तापसाः कुत्र दैवतान्युपासते ?

(v) रघुनाथः भारतदेशस्य कस्मिन् राज्ये जनिमलभत ?

(vi) लक्ष्मीः किं न अनुबुध्यते ?

**किंवा**

**Rearrange the following sentences as per the chronological order :4**

(i) मानवाः न विश्वासार्हाः इति सर्व पशवः वदन्ति।

(ii) तेन दूरात् कोऽपि व्याघ्रो दृष्टः।

(iii) ततः प्राप्तायाम् उषसि तेन पुरूषेण निद्रा त्यक्ता।

(iv) एकदा कोऽपि पुरुषो मृगयायै वनमेकं जगाम।

**(B) Translate into English any one of the following passages :** **5**

(i) एकदा महाराजबिम्बसारः तीर्थंकरं महावीरम् उपगम्य प्रणम्य च मुक्तिमार्गम् अपृच्छत्। महावीरोऽब्रवीत् - राजन्। अहंकारः नरकस्य द्वारम्। अभिमानी नरकं प्राप्नोत्येव। भवान् स्वीयराजकोषस्य स्वीयाधिकारस्य च अहंकारस्य त्यागं विना मुक्तेः अवस्थां प्राप्तुं न शक्तोऽसि।

(ii) लवः - आर्य, क एष चन्द्रकेतुर्नाम ?

जनकः - जानासि रामलक्ष्मणौ दाशरथी ?

लवः - एतावेव रामायणकथापुरुषौ।

जनकः - अथ किम्।

लवः - तत् कथं न जानामि ?

जनकः - तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः - ऊर्मिलायाः पुत्रस्तर्हि मैथिलस्य राजर्षेः दौहित्रः।

**(C) Translate into English any one of the following groups of verses : 4**

(i) 1. नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ।।1।।

2. विरला जानन्ति गुणान् विरलाः कुर्वन्ति निध्रने स्नेहम्।
विरलाः परकार्यरताः परदुःखेनापि दुःखिता विरलाः ।।2।।

(ii) इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन।
अरसिकेषु कवित्वनिवेदनं
शिरसि मा लिख मा लिख मा लिख।।

**Q.6. Write 5-6 sentences in Sanskrit on any one of the following topics :5**

(i) मम माता,(ii) ग्रीष्मवर्णनम् (iii) वृत्तपत्राणि।

किंवा

**चित्राखाली दिलेल्या शब्दांच्या साहाय्यने सोबतच्या चित्राचे संस्कृतात पाच-सहा वाक्यांत वर्णन करा :**



| |
|---|
| मञ्जूषा - उद्यानम्, शिलापट्टिका, भ्रमणम्, जलधारायन्त्रम्, गुल्मानि, पुष्पमंडपः, रमणीयम्, प्रसन्नता। |

**Q.7. How is imaginative power of कालिदास seen in the story "कालिदासस्य चातुर्यम्" : 5**